शीतलं देहे चाङ्गञ्चोष्णं प्रजायते। काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः” अत्र मतान्तरम्। “काये श्लेष्मा यदा दुष्टः पित्तञ्चान्ते व्यवस्थितम्। शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः”।

शीतपूर्वोज्वरो यथा।

“त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे। तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च”।

दाहपूर्वो ज्वरो यथा

“करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः। द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ। दाहपूर्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः”।

वातादिज्वराणां धातुविशेषदुष्यतया रसादिगतदोषज ज्वराणां लक्षणानि

“गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ। रसस्थे त्वज्ज्वरे लिङ्गं दैन्यञ्चास्योपजायते”१। रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ। प्रलापः पिड़का तृष्णा रक्तप्राप्ते ज्वरे नृणाम् २। पिण्डिकोद्वेष्टनं तृष्णा दुष्टमूत्रपुरीषता। उष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे३। भृशं स्वेद स्तृषा मूर्च्छा प्रलापश्छर्दिरेव च। दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ४। भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च। विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ५। तमः प्रवेशनं हिक्का कासः शैत्यं वमिस्तथा। अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे ६। मरणं प्राप्नुयात् तत्र शुक्रस्थानगते ज्वरे ७। शेफसः स्तब्धतामोक्षः शुक्रस्थे तु विशेषतः”।

ऋतुभेदे प्राकृतादिज्वरविशेषो यथा

“वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्। वैकृतोऽन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः। वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्। कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः। तत् प्रकृत्या विदध्याच्च तत्र नानशनाद्भयम्। कफो वसन्ते तमपि वातपित्तं भवेदनु। काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा।

अन्तर्वेगज्वरलक्षणम्

“अन्तर्दाहोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः। सन्ध्यस्थिशूलमस्वेदो दोषवर्चो विनिग्रहः। अन्तर्वेगस्य लिङ्गानि ज्वरस्यैतानि लक्षयेत्”।

बहिर्वेगज्वरलक्षणम् “सन्तापोऽभ्यधिको वाह्यस्तृष्णादीनाञ्च मार्दवम्। बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च”।

आमज्वरलक्षणम्

“लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः। तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता। क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः। आमज्वरस्य लिङ्गानि न दद्यात् तत्र भेषजम्। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्।

पच्यमानज्वरस्य लक्षणं यथा

“ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः। मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम्”।

पक्वज्वरस्य लक्षणम्

“क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम्। दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम्”।

साध्यज्वरस्य लक्षणं यथा

“बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः”।

असाध्यज्वरलक्षणं यथा।

“हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः। ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः। ज्वरक्षीणस्य शूनस्य गम्भीरो दैर्घ्यरात्रिकः। असाध्यो बलवान् यश्च केशसीमन्तकृज्ज्वरः”।

गम्भीरस्य लक्षणं यथा “गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया। आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च। आरम्भाद्विषमो यस्तु यश्च वा दैर्घ्यरात्रिकः। क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम्। विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा। शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः। यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान्। वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम्। हिक्काश्वासतृषायुक्तं मूढविभ्रान्तलोचनम्। सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः। हतप्रभेन्द्रियक्षाममरोचकनिपीडितम्। गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत्”।

ज्वरस्योपद्रवा रक्षितोक्ताः यथा

“श्वासोमूर्च्छाऽरुचिश्छर्दिस्तृष्णातीसारविड्ग्रहाः। हिक्काकासोऽङ्गभेदश्च ज्वरस्योपद्रवा दश”।

ज्वरमुक्तिपूर्वरूपम्। “दाहः स्वेदो भ्रमस्तृष्णा कम्पविड्भिसंक्षिता। कूजनञ्चास्यवैगन्ध्यमाकृतिर्ज्वरमोक्षणे”।

“ज्वरमुक्तलक्षणं “स्वेदो लघुत्वं शिरसः कण्डूपाकोमुखस्य च। क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम्”।

सुश्रुतगारुड़ाद्युक्ताद् विशेषज्ञापनाय पृथगुपन्यासः।